आरण्यसंहिता

श्रीमत् सायणाचार्यकृतभाष्यसहिता ।

ARANYASANHITA

OF

SAMAVEDA.

WITH THE COMMENTARY

OF

SAYANACHARYA.

EDITED AND PUBLISHED

BY

PANDIT JIBANANDA VIDYASAGARA, B A

Superintendent Free Sanskrit College, Calcutta

SECOND EDITION

CALCUTTA

PRINTED AT THE SARASWATI PRESS

1891

To be had from Pandit Jibananda Vidyasagara, B. A

Free Sanskrit College, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि।

१ आशुबोधव्याकरणम्	२
२ धातुरूपादर्श }	१॥०
३ शब्दस्तोममहानिधि	८
४ सिद्धान्तकौमुदी सरलासहिता	१०
५ सिद्धान्तबिन्दुसार (वेदान्त)	॥०
६ तुलादानादिपद्धति (बङ्गाक्षरे)	४
७ गयाश्राद्धादिपद्धति	१
८ शब्दार्थरत्नम्	॥
९ वाक्यमञ्जरी (बङ्गाक्षरे)	।०
१० सटीक छन्दोमञ्जरी वृत्तरत्नाकर	॥०
११ वेणीसंहारनाटक सटीक	॥०
१२ मुद्राराक्षसनाटक सटीक	१
१३ रत्नावलीनाटिका सटीक	॥०
१४ मालविकाग्निमित्रनाटक सटीक	१
१५ धनञ्जयविजयनाटक सटीक	।०
१६ महावीरचरितनाटक सटीक	१।०
१७ महावीरचरितनाटक मूलमात्र	॥०
१८ वैयाकरणभूषणसार	॥०
१९ लीलावती भास्कराचार्यरचित	॥०
२० बीजगणित भास्कराचार्यरचित	॥०
२१ शिशुपालवधकाव्य सटीक (माघ	१
२२ किरातार्जुनीयकाव्य सटीक	१॥०
२३ कुमारसम्भवकाव्यपूर्वखण्ड सटीक	०
२४ कुमारसम्भवकाव्य उत्तरखण्डसटीक	१
२५ अष्टकम् पाणिनीयम्	।०
२६ वाचस्पत्यम् (बृहदभिधान)	१००
२७ कादम्बरीविवृतव्याख्यासहिता	३
२८ राजप्रशस्ति सटीक	।
२९ अनुमानचिन्तामणि तथा अनुमानदीधिति न्यायशास्त्र	४।
३० सर्वदर्शनसंग्रह दर्शनशास्त्र	१
३१ भामिनीविलासकाव्य सटीक	।०

३२ हितोपदेश सटीक

३३ भाषापरिच्छेदमुक्तावल्यादि

३४ बहुविवाहवाद

३५ दशकुमारचरितगद्यकाव्य ३

३६ परिभाषेन्दुशेखर

३७ कविकल्पद्रुम (धातुपाठ)

३८ चक्रदत्त (वैद्यक)

३९ उणादिसूत्र सटीक

४० मेदिनीकोष

४१ पञ्चतन्त्रम् विष्णुशर्मकृत सटी

४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य

४३ माधवचम्पूकाव्य

४४ तर्कसंग्रह व अनुवादसहित

४५ प्रसन्नराघवनाटक जयदेवकृत

४६ विवेकचूडामणि वेदान्त

४७ काव्यसंग्रह मूलमात्र

४८ काव्यसंग्रह सटीक (सम्पूर्ण)

४९ ऋतुसंहार काव्य सटीक

५० विक्रमोर्वशी नाटक (सटीक

५१ वसन्ततिलक भाणनाटक

५२ गायत्री व्याख्या

५३ सांख्यदर्शन (भाष्यसहित)

५४ भोजप्रबन्ध

५५ नलोदय काव्य सटीक

५६ ईश केन कठ प्रश्न मुण्ड माण्डू
उपनिषद् (सटीक सभाष्य)

५७ छान्दोग्य उपनिषद् सटीक स

५८ तैत्तिरीय ऐतरेय श्वेताश्वतर
(उपनिषद्) सभाष्य सटीक

५९ बृहदारण्यक सटीक सभाष्य

६० सुश्रुतसंहिता सटीक (वैद्यक)

६१ शार्ङ्गधरसंहिता (वैद्यक)

सामवेदस्य

आरण्यसंहिता ।

श्रीमत् सायणाचार्य्यकृतभाष्यसहिता ।

पण्डितकुलपतिना
बि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृता प्रकाशिता च ।

द्वितीयसंस्करणम् ।

कलिकातानगर्य्यां
सरस्वतीयन्त्रे
मुद्रिता ।

इ १८९१ ।

প্রকাশক—শ্রীজীবানন্দ বিদ্যাসাগর
২নং রমানাথ মজুমদারের ষ্ট্রীট।

প্রিন্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৫ নং আমহার্ষ্ট ষ্ট্রীট।

आरण्य-संहिता ।

श्री नमः सामवेदाय ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
कृपालुः सायणाचार्य्यो वेदार्थं वक्तुमुद्यतः ।
आरण्यकाभिधः षष्ठोऽध्यायो(क) व्याक्रियतेऽधुना ॥ ३ ॥
तवेन्द्रेत्यादिकानान्तु पञ्चपञ्चाशतां क्रमात् ।
ऋषिश्छन्दोदैवतञ्च तत्र तत्राभिदध्महे ॥ ४ ॥
तत्राद्याया ऋचो द्रष्टा भरद्वाजः प्रकीर्त्तितः ।
द्वितीयस्य वसिष्ठः स्यात्, तृतीयाया ऋचः स्मृतः ॥ ५ ॥
वामदेवस्ततश्छन्दो बृहती त्रिष्टुबेव च ।
गायत्रीति क्रमादिन्द्रो भवेत् तिसृषु देवता ॥ ६ ॥

(क) अत्र आर्चिक-ग्रन्था इति विवरणादि-सकल-ग्रन्थ-सम्मता वैदिक-सम्प्रदायानुगताः पुस्तकाद्यन्त समीक्षणेनोपलभ्यन्ते । तत्र च षडध्यायकश्छन्दो नाम एकः, अपरो नवाध्यायात्मक उत्तरः, ताभ्यामन्यत् षष्ठोऽध्यायैकात्मक आरण्य इति व्यवहृतः । सायण-मते तु नैवम् । अयं हि पञ्चोपविभागैरेव छन्दोग्रन्थं परिसमाप्य तस्यैव षष्ठोपभाग एव इति मन्यते ।

प्रथम-खण्डे—

सैषा प्रथमा।

भरद्वाजऋषिः, बृहतीछन्दः, इन्द्रोदेवता।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
ओम्। इन्द्रज्येष्ठन्नआभरओजिष्ठम्पुपुरिश्रवः।
१र २र ३ १ २ ३ १ २ ३र
यद्दिधृक्षेमवज्रहस्त (१) रोदसीउभेसुशिप्रपप्राः
॥ १ ॥

हे 'इन्द्र'। (ख) 'ज्येष्ठ' प्रशस्यतमम् 'ओजिष्ठम्' अतिशयेन बलकरम् 'पुपुरि' पूरक 'श्रव' अन्न 'न' अस्मभ्यम् 'आभर' आहर प्रयच्छ। हे 'वज्रहस्त'। वज्रबाहो। हे 'सुशिप्र'। शोभनहनुक। एवम्भूत। हे इन्द्र। 'यत्' अन्न 'दिधृक्षेम' धारयितुमिच्छेम, यच्चान्नम् इमे परिदृश्यमाने 'उभे रोदसी' द्यावापृथिव्यौ 'आ पप्राः' आ पूरयसि, तदन्नमाहरत्यन्वयः ॥१॥

अथ द्वितीया।

वसिष्ठऋषिः, त्रिष्टुप्छन्दः, इन्द्रोदेवता।

२ ३ १ ३ १ २ ३ १र २र ३ २ ३ १ ३ २
इन्द्रोराजाजगतश्चर्षणीनामधिक्षमाविश्वरूपं-
३ २ १ २ ३ २ ३ १ २ ३ २ उ ३ १ २
यदस्य। ततोददातिदाशुषेवसूनिचोदद्राधउप-

---

(१) "येनेमेचिद्वज्रहस्त"—इति बह्वृचां पाठः।

(ख) "इन्द्रतेजिष्ठं-बलेन"-इति नैरुक्तम् २का० १०ख० ८स०
ईश्वरत्वार्थमिति तद्भाष्यम्।

१ २
स्तुतं चिदर्वाक् ॥ २ ॥

स 'इन्द्र' 'जगतो' जङ्गमस्य पश्वादे यतो 'राजा' ईश्वरो भवति चर्षणीनां मनुष्याणां च राजा भवति। किञ्च। अधि क्षमा (सप्तम्येकवचनस्य लुक) क्षमायां (भ) 'विश्वरूप' 'यत्' धनमस्ति तस्यापि राजा भवति। 'ततो ददाति दाशुषेव सूनि' यजमानाय वसूनि धनानि ददाति। स इन्द्रोऽस्माभि उपस्तुते सम्यक स्तुत राध' धन 'अर्वाग्' अस्मदभिमुख 'चोदत्' प्रेरयतु। २।

अथ तृतीया।

वामदेवऋषि, गायत्रीच्छन्द, इन्द्रोदेवता।

१ १ २ २ २ १ २ २ ३क २ १ क २र
यस्येदमारजोयुजस्तुजेजनेवन५स्वः

१ २ २ १ २ २ २
इन्द्रस्यरन्त्यंबृहत् ॥ ३ ॥

'रजोयुज' ज्योतिर्भिर्युक्तस्य (ज्योतीरज उच्यत इति यास्क) अत्यन्ततेजस्विनो 'यस्य इन्द्रस्य 'इद' पुरोवर्ति स्तोत्र युक्त हविरस्ति तद्वपि 'स्व' स्वर्गं सर्वत्र वा 'तुजे' दातरि जने यजमानविषये 'वन यतो वननीय सम्भजनीय खलु।

---

(२) "अधिक्षमा" "अधिक्षमि" इति, "विश्वरूपं" 'विषुरूपम्" इति, "उपस्तुतम्" "उपस्तुत" इति च सास्र ऋच पाठभेद।

अतः 'इन्द्रस्य' दानं 'रत्नम्' अत्यन्तरमणीयं 'बृहत्' प्रभूतं भवति ॥ ३ ॥

अथ चतुर्थी।

शुनःशेपऋषिः, चतुष्पाज्जगतीच्छन्दः, वरुणो देवता।

१२ ३११ २१ ३१२र ३र३ १र ३र २ १ २
उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय।
१२ ० ३१२१र ३र१ २ १ १ २०
अथादित्यव्रतेवयन्तवानागसोअदितयेस्याम ॥४॥

आद्ये ऋचौ चतुष्पादे ह्येकपादयुतान्तिमा।
शौनःशेपो गार्त्समदो वामदेवीति ताः क्रमात्।
वारुणी पावमानी च वैश्वदेवीति संस्तुताः।

हे 'वरुण'! (घ) 'उत्तमम्' उत्कृष्टं शिरसि बद्धं 'पाशम्' 'उच्छ्रथाय' उत्कृष्टं शिथिलं कुरु। 'अधमं' निकृष्टं पादेऽवस्थितं पाशं 'अवश्रथाय' अव अधस्तात् शिथिलीकुरु। 'मध्यमं' नाभिदेशगतं पाशं 'विश्रथाय' वियुज्य शिथिलीकुरु। 'अथ' अनन्तरं हे 'आदित्य' अदितेः पुत्र! (ङ) वरुण!

---

(४) "अथादित्यव्रतेवयन्तव"-"अथावयमादित्यव्रतेतव"— इति अत्र ऋचः पाठभेदः।

(घ) "दक्षस्य वादिते जन्मनि व्रते राजानौ मित्रावरुणा विवासि। अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ऋ० १०म० ६, ३, ५"-इति मन्त्रलिङ्गात्—"अहोरात्रे मित्रावरुणौ ब्रा० ११क० २२ख०"-ऐतरेय-भाष्यात् मित्रपदेन दिवा, वरुणपदेन च रात्रिः स्वपद। "वरुणः वृणोतीति सतः नि० १०अ० ३ख०"-इति श्रुतिपदनात् सर्वेषां वरुणादीनां तमोरूपेण आवरकत्व।

(ङ) "अदितिर्दीना"-- 'अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता

'वय' पुन येषा: 'तव' व्रते त्वदीये कर्मणि 'अदितये' अखण्डन-राहित्याय 'अनागस' अपराध-रहिता 'स्याम' भवेम ॥ ४ ॥

अथ पञ्चमी।

गृत्समदऋषि, चतुष्पाज्जगती छन्द, पवमानोदेवता।

१ २ ३ १र ३र   २ १ २ ३ १र २र   ३ १ २
त्वयावयंपवमानेनसोमभरेकृतंविचिनुयामशश्वत्।
१ २ ३ १ २   ३ १ २ ३ १ २ ३ २
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवी-
२ २
उत द्यौः ॥ ५ ॥

हे 'सोम'! (ख) पवमानेन पवित्रेण पूयमानेन 'त्वया' सहायेन 'भरे' (सङ्ग्राम नाम) सङ्ग्रामे शश्वद् बहु 'कृत' कर्त्तव्य' 'वय' 'विचिनुयाम' विशेषेण कुर्य्याम। यस्मात्तव माहात्म्येन कर्माणि कुर्मः 'तत्' तस्मात् अस्मान् 'मित्रो वरुण अदिति' एतन्नामिका, 'सिन्धु' (ग) एतदभिधाना, तथा 'पृथिवी', 'उत' 'अपिच 'द्यौ'; एते मित्राद्य 'नः' अस्मान् 'मामहन्ताम्' पूजयन्तु धनादि दानेन ॥ ५ ॥

स पिता स पुत्र। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्"-इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा"—इति नैरुक्तम् ४अ० ३ख० ४२ ४४ख०। इति अखण्डनं अदनादेरदितिरिति विवक्षोर्थो भाष्यादिकम्।

(ख) सोम सुनीते"-इत्यादि नैरुक्तम् ४अ० १पा० २ख०। यथाच सोम वर्णितः महर्षिभिः।

(ग) सिन्धु समुद्र, समुद्र इति अन्तरिक्षनामसु पठितम् एतत् नि० १, ३।

अथ षष्ठी।

वामदेवऋषिः, एकपाज्जगतीच्छन्दः, विश्वेदेवा देवता।

२ १र २र २ २ उ२ ३
इमंवृषणंकृणुतैकमिन्माम् ॥ ६ ॥

पूर्वस्या ऋचि प्रकृता हे मित्रादयो देवाः। यूयम् 'एकम्' अद्वितीयं दानकर्मणि 'इम' सोमं 'वृषणं' कामानामभिवर्षकं 'कृणुत' कुरुत। तथा 'इमा' क्रिया फलाभिवर्षिका कुरुत ॥६॥

अथ सप्तमी।

अमहीयु ऋषिः, गायत्रीच्छन्दः, पवमानो देवता।

२ ३२ ३१ २ ३१२ ३१
सनइन्द्राययज्यवेवरुणायमरुद्भ्यः।
२ १र २र
वरिवोवित्परिस्रव ॥ ७ ॥

गायत्र्यौ पावमान्यौ तु सनइत्यादिके ऋचौ।
अमहीयुस्तयोरेव छन्दोदैवतनिर्णयः ॥ १ ॥

हे सोम। (ज) 'सः' 'वरिवोवित्' धनस्य लम्भकस्त्वं 'नः' अस्माकं 'यज्यवे' यष्टव्यायेन्द्राय (झ) 'वरुणाय' (ञ)

(ज) "अथैषा परा भवति चन्द्रमसो वैतस्य वा"—२का॰ ११अ॰ ४ख॰।

(झ) "इरा इरावतीति वेरा दधातीति वा"—इत्यादि नैरुक्तम् २का॰ १०अ॰ ८ख॰। इरापदेन जलं प्रसिद्धम्, जलयोनित्वान्तरिक्षस्थाग्नेरितीन्द्रपदेनाग्निरपि बुध्यते।

(ञ) "वरुणं कबन्धं प्र-ससर्ज"—इत्यादि-मन्त्रलिङ्गात् वरुणो मेघवर्षणे हेतुभूतः, स च [illegible] प्रसिद्धः।

'मरुद्भ्य' (८) च 'परिस्रव' धारया क्षर ॥ ७ ॥

अथाष्टमी ।

अमहीयुर्ऋषि, गायत्रीच्छन्द, पवमानोदेवता ।

२ १र ३र २ २उ २ २ २ १ २
एनाविश्वान्यर्यंआद्युम्नानिमानुषाणाम् ।

१ २
सिषासन्तोवनामहे ॥ ८ ॥

'एना' एतेनात्वेन सोमेन 'मानुषाणां' मनुष्याणां 'विश्वानि' 'द्युम्नानि' धनानि 'अर्यः' अभिगच्छन्तः 'सिषासन्तः' सम्भोक्तुमिच्छन्तश्च वयं 'वनामहे' भजामहे ॥८॥

अथ नवमी ।

त्रिष्टुभा अन्नदेवता आत्मानमेवाह—आत्मा एव ऋषि ।

२ १ २ ३ २ ३ २ २
अहमस्मिप्रथमजाऋतस्य-

१ २ ३ १ २ ३ १ २ २ १ २
पूर्वंदेवेभ्योअमृतस्यनाम ।

२ १ २ ३ २उ ३ १ २ ३
योमाददातिसइदेवमावद-

२उ २ ३ १ ३ १ २
हमन्नमन्नमदन्तमद्मि ॥ ९ ॥

'देवेभ्यः' पूर्वं अग्नि वरुणादि देवेभ्य पुरा 'अहम्' अन्न

---

(८) 'मरुतो मितराविणो वा, मितरोचिनो वा, महद् द्रवन्तीति वा' इति नैरुक्तम् ११अ० ३पा० १३ख० । 'वायुर्वै क्षेपिष्ठा देवता'-इति च श्रूयते । ततो मरुतो वायव इति सिद्धान्त ।

देवता ‘अमृतस्य’ विनाश-रहितस्य ‘ऋतस्य’ सत्यस्य परब्रह्मणः सम्बन्धिनी ‘प्रथमजा असि नाम’ प्रथमत एवोत्पन्ना भवामि खलु । ‘यः’ पुमान् ‘मां ददाति’ अन्नरूपां माम् अतिथ्यादिभ्यो ददाति ‘स इत्’ स एव ‘एव’ परिदृश्यमान-प्रकारेण ‘आवत्’ अवति सर्वान् प्राणिनो रक्षति । यस्तु लोभ युक्तः सन् प्राणिभ्योऽन्नमदत्वा स्वयमेव तदन्नमत्ति । ‘अन्नम् अदन्त’ नानाविधामन्नमश्नन्तं तं लोभिनम् ‘अहमन्नम्’ अन्न देवता ‘अद्मि’ भक्षयामि विनाशयामीत्यर्थः ॥ ९ ॥

इति प्रथमः खण्डः ।

* * *

अथ—द्वितीयखण्डे—

सैषा प्रथमा ।

श्रुतकक्ष ऋषिः, इन्द्रोदेवता, गायत्रीच्छन्दः ।

२ ३ १ २ ३ २ १ २
त्वमेतदधारयःकृष्णासुरोहिणीषुच ।
१ २ २ ३ १ २
परुष्णीषु*रुशत्पयः ॥ १० ॥

अस्य सामर्थ्यमेवोपपादयति । हे इन्द्र ! ‘कृष्णासु’ कृष्णवर्णासु गोषु । ‘तथा रोहिणीषु च’ [“वर्णादनुदात्तात्तोपधात्तोन इति ङीप्) रोहितवर्णासु [‘परुष्णीषु’ परुष्णी पर्ववतीति यास्कः] पर्वयः पर्वयो नानावर्णासु च गोषु ‘रुशत्’ [रोचतेर्दीप्ति-कर्मणः] दीप्यमानं श्वेतम् ‘एतत्’ परिदृश्य-

---

* “पुरुष्णीषु” इति ऋग्वेदीयः पाठः ।

मानं 'पयः' क्षीरं त्वम् 'अधारयः' धारयसि। तस्मात् त्वां पूजयाम इति समन्वयः॥ १०॥

अथ द्वितीया।

पवित्रऋषिः, जगतीच्छन्दः, पवमानो देवता।
अरूरुचदिति त्वेतां पवित्रो दृष्टवानृषिः।
पवमानो देवता स्याच्छन्दश्च जगती स्मृता॥

१ २ २ २ १ १ २ १ २ १ १ २ २ १
अरूरुचदुषसःपृश्निरग्रियउक्षामिमेतिभु-

३ २ ३ २ १ २
वनेषुवाजयुः। मायाविनोममिरेअस्य-

२ १ र २ १ २ २ र २ र २ १ र
माययानृचक्षसःपितरोगर्भमादधुः॥ ११॥

['उषसः' सम्बन्धी 'पृश्निः' आदित्यः(ठ) [पृश्निरादित्यो भवति, प्राश्नुत एनं वर्ण इति नैरुक्ताः]। 'अग्रियः' अग्र्यः मुख्यः सोमः 'अरूरुचत्' रोचयति। स 'उक्षा' जलस्य सेक्ता पर्जन्यः सन् 'मिमेति' अभ्रं शब्दायति। 'भुवनेषु' भूतजातेषु 'वाजयुः' तेषामन्नमिच्छन्; 'मायाविनः' माया प्रज्ञा तद्वन्तो देवाः 'अस्य' सोमस्य 'मायया' प्रज्ञया 'ममिरे' निर्मितवन्तः [सोमस्य एकैकांश-पानश्रमात् अग्न्यादयः स्व-स्व-व्यापारैश्च जगत् सृजन्तीत्यर्थः]। तथा 'अस्य' मायया 'नृचक्षसः' नृणां

---

(११) "मिमेति भुवनेषु"—"बिभर्ति भुवनानि—"इति सामर्चः पाठभेदः

(ठ) '[illegible]' इति च नैरुक्तम् २अ० ११ख० १० पृ०।

द्रष्टारः 'पितरः' पालका देवाः अङ्गिरसः पितरो वा 'गर्भम्' 'आदधुः' धारयन्ति ओषधीषु।

स चात्र सूर्य्यात्मा सोमः स्तूयते। सूर्य-रश्म्यनुगमाधीनवर्द्धनाच्च चन्द्रस्य ॥

यद्वा अयमुषसः रश्मिः सविता अश्ववत्·दीपयति दीप्यते वा। सर्वं शिष्टं समानम्। तत्सम्बन्धिनो नृणां द्रष्टारः पितरो जगद्रक्षकाः रश्मयो गर्भमादधुरित्यर्थम् ॥११॥

अथ तृतीया।

एयोर्मधुच्छन्दो वैश्वामित्रो द्रष्टा गायत्रीच्छन्द इन्द्रो देवतेति।

२ २ २ ३ १ २ २ १ २ २ १ १ २ १ २
इन्द्रइद्धर्योःसचासम्मिश्लआवचोयुजा ।

१ २ २ १ २ २ १ २
इन्द्रोवज्रीहिरण्ययः ॥ १२ ॥

'इन्द्रइत्' इन्द्र एव 'हर्योः' हरि-नामकयोरश्वयोः 'सचा' सह युगपत् 'आ सम्मिश्लः' सर्वतः सम्यङ्मिश्रयिता। कीदृशयोर्हर्योः? 'वचोयुजा' इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः। अयम् 'इन्द्रः' 'वज्री' वज्र-युक्तः 'हिरण्ययः' हिरण्मयसर्वाभरणैरुपेत इत्यर्थः ॥ १२ ॥

अथ चतुर्थी।

मधुच्छन्दाविश्वामित्रऋषिः, गायत्रीच्छन्दः, इन्द्रो देवता।

२ १ २ २ १ २
इन्द्रवाजेषुनोवसहस्रप्रधनेषुच ।

२ १ २ १ २ ३ १ २
उग्रउग्राभिरूतिभिः ॥ १३ ॥

हे इन्द्र! 'उग्रः' शत्रुभिरप्रधृष्यस्त्वम् 'उग्राभिः' अप्रधृ-

याभिः ऊतिभिः अस्मद्द्वेष-परः-पक्षाभिः 'वाजेषु' युद्धेषु 'नः' अस्मान् 'अव' रक्ष । तत्र 'मघवत्समधनेषु' च महत-मनुष्या-कृगजाश्वादि लाभ-युक्तेषु महायुद्धेष्वपि रक्ष ॥ १२ ॥

अथ पञ्चमी ।

प्रथ ऋषिः, त्रिष्टुप्छन्दः, विश्वे देवा देवताः ।

१ ॰ २ १ २ २ १ ॰ ३ १   २र   ३ १
प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हवि-
॰ ३ २   १   १र   २ ॰ ३ १
षो हविर्यत् । धातुर्द्युतानात्सवितुश्च वि-
॰   ३ १ र २ र ३ १ ॰
ष्णो रथन्तरमाजभारा वसिष्ठः ॥ १४ ॥

अपश्यत् प्रथ इत्येतां त्रिष्टुभं प्रथनामकः ।
वैश्वदेवी भवेदेव छन्दोदैवत निर्णयः ॥ १ ॥

'यस्य' वसिष्ठस्य 'प्रथ नाम' पुत्रः, यस्य भरद्वाजस्य 'सप्रथ' नाम पुत्रः—तयोर्मध्ये 'वसिष्ठः' मम पिता 'आनुष्टुभस्य' अनुष्टुप्छन्दसा युक्तस्य 'हविषः' घर्माख्यस्य 'हविः' हविष्प्रापादक 'रथन्तरं' नाम तद्रथन्तरं 'धातुः' धातृसंज्ञादेवात् (ड) । 'द्युतानात्' द्योतमानात् 'सवितुः' (ढ) 'विष्णोः' (ण) 'आजभार' आजहार आहृतवान् (द्विपदोमं इति भवम् ।) रथ-शब्दोपपदात्तरतेः संज्ञायां भृतवृजीति खच् । अरुर्द्विषद-जन्तस्येति मुमागमः ॥ १४ ॥

(ड) 'धाता-विधाता' सर्वस्य इति नैरुक्तम् ११का॰ ११ख॰ १०ख॰ ।

(ढ) 'सविता सर्वस्य प्रसविता,—इति नैरुक्तम् ११का॰ १०ख॰ ३१ख॰ ।

(ण) 'विष्णुर्विशतेर्वा व्यश्नोतेर्वा'-इत्यादि नैरुक्तम् १२का॰ ११ख॰ १९ख॰ । एतच्च विष्णुशब्देन च सर्वव्यापी सर्वान्तर्यामीति विज्ञानं)

अथ षष्ठी ।

नियुत्वानिति गायत्री वायु शुक्रमदोऽब्रवीत् ।

२ १ २ र १ २ १ २ १ २
नियुत्वान्वायवागह्ययꣳशुक्रो अयामि ते ।
१ २ ३ २ ३ २
गन्तासि*सुन्वतो गृहम् ॥ १५ ॥

हे ‘वायो !’ (त) ‘नियुत्वान्’ नियुतो वाहनानि वायो (नियुतो वायोरिति निघण्टुः) तैर्युक्तस्त्वम् ‘आगहि’ आगच्छ । ‘अयं’ ‘शुक्र’ दीप्यमान सोम ‘ते’ तुभ्यम् ‘अयामि’ (यम कर्मणि लुङि रूपम्) नियतो गृहीत आसीत् । यत ‘सुन्वत’ सोमाभिषवं कुर्वतो यजमानस्य ‘गृह’ ‘गन्तासि’ यातोऽसि ॥ १५ ॥

अथ सप्तमी ।

नृमेधपुरुमेधौ ऋषयो ऐन्द्री अनुष्टुभ ।

१र २र २ ३१ ३१२
यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
१ २ २ १ २ २ १ २ ३ १ २ १र २
तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ १६ ॥

हे ‘अपूर्व्य !’ त्वत्तो व्यतिरिक्तेन पूर्वेण वर्जित ! हे ‘मघ

---

* “गतासि” इति ऋग्वेदपाठ ।

(त) ‘वायुर्नियुतो स्याद् गतिकर्मण’ इत्यादि नैरुक्तम् १० । ११ । २ अ० ।

वन् ।' महनीयतम । धनवन्निन्द्र । 'वृत्रहत्याय' (थ) वृत्रासुरहननाय 'यद्' यदा त्वं 'जायथा' उत्पन्नः प्रादुर्भूतोऽसि 'तत्' तदानीमेव 'पृथिवीं' प्रथमानाम् 'अप्रथय' प्रसिद्धां दृढामकरोः । 'उत' अपिच 'दिव' द्यां द्युलोकं अन्तरिक्षेण 'अस्तभ्ना' निरुद्धामकार्षीः (ईदृशं वीर्यं त्वदन्यस्य न भवतीत्यर्थं द्योतयितुम् अपूर्व्येति पदम्) ॥ १६ ॥

इति द्वितीयः खण्डः ।

अथ तृतीयखण्डे —

सैषा प्रथमा ।

वामदेवऋषि प्रोक्तो मयीत्यस्याः प्रजापतिः ।
देवतास्यास्ततश्छन्दोऽनुष्टुप् सप्त स्वरीरितम् ॥

२ ३ १ २ ३ २ १ १ २ ३१ २ ३ २ ३१२ ३१२
मयिवर्चोअथोयशोथोयज्ञस्ययत्पयः ।

२ ३ २ ३ २ ३ ३१ २ ३२
परमेष्ठीप्रजापतिर्दिविद्यामिवदृꣳहतु ॥१७॥

'परमेष्ठी' परमे लोके तिष्ठतीति परमेष्ठी प्रजापति (द) 'दिवि' द्योतमाने स्वर्गे 'द्यामिव' द्योतमानां कान्तिमिव ।

(थ) 'अथास्य कर्म—रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्मैव तत्' इति नैरुक्तम् दैका० ७अ० १०ख० । 'इन्द्रकर्मैवेतत्'-इति सत्यव्रतसामश्रमः ।

(द) 'प्रजापतिः प्रजानां पाता पालयिता वा'-इत्यादि नैरुक्तम् दैका० १० अ० ४१, ४२ ख० ।

'मयि' मदीये शरीरे 'वर्चः' तेजः ब्रह्मवर्चसं 'दृंहतु' वर्धयतु । 'अथो' अपि च 'यशः' 'दृंहतु' । 'अथो' किञ्च । 'यज्ञस्य' यागस्य सम्बन्धि अतएव स उत्तमं 'पयः' हविर्लक्षणमन्नं च दृंहतु ॥ १७ ॥

अथ द्वितीया ।

त्रिष्टुभः पावमान्याः स्वार्हायगौतमनामकः ।

२ १२ ३ १ २ २ २ २ ३र३१
सन्तेपयाᳪंसिसमुयन्तुवाजाःसंवृष्ण्यान्यभि
२ १ २ ३ १ २ ३ १ २
मातिषाहः । आप्यायमानोअमृतायसोम
२ १र १ २र २ १ २
दिविश्रवाᳪंस्युत्तमानिधिष्व ॥ १८ ॥

हे 'सोम !' 'अभिमातिषाहः' अभिमातीनां शत्रूणां हन्तुः 'ते' तव एवंभूतं त्वां 'पयांसि' अप्यायकानि क्षीराणि 'संयन्तु' सङ्गच्छन्ताम् । तथा 'वाजाः' हविर्लक्षणान्यन्नानि च त्वां सङ्गच्छन्ताम् 'वृष्ण्यानि' वीर्याणि च सङ्गच्छन्ताम् । हे सोम ! त्वं 'अमृताय' आत्मनः अमृतत्वाय अमरत्वाय 'आ' समन्तात् वर्धमानः सन् 'दिवि' नभसि स्वर्गे 'उत्तमानि' उत्कृष्टतमानि उत्कृष्टानि 'श्रवांसि' अन्नानि अस्माभिः भोक्तव्यानि हविर्लक्षणानि 'धिष्व' धारय (ते क्रिया-पदं कर्तव्यमिति कर्मणः सम्प्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥ १८ ॥

अथ तृतीया ।

(ऋष्यादिकम् पूर्ववत्)

२ १र १ २र २ २ १ २ २१ २
त्वमिमाओषधीःसोमविश्वास्त्वमपोअज-

१ २   १ २   २ १ १ २ २
नयस्त्वंगाः । त्वमातनो*र्वान्तरिक्षं

१र   २र २ १र ३१
त्वंज्योतिषावितमोववर्थ ॥ १९ ॥

हे 'सोम ! 'त्वम्' 'इमा' भूम्यां वर्त्तमाना 'विश्वा' सर्वाः 'ओषधी' 'अजनयः' उत्पादितवानसि । तथा 'त्वम्' 'अप' तासामोषधीनां कारणभूतानि वृष्ट्युदकानि अजनय । तथा 'त्वं' 'गा' सर्वान् पशून् उदपादयः । 'उरु' विस्तीर्णम् 'अन्तरिक्ष' 'त्वम्' 'आततनोः' विस्तारितवानसि । तस्मिन्नन्तरिक्षे यत् 'तम' अस्मद्दृष्टिनिरोधकम् अन्धकारं यदपि 'त्वं' 'ज्योतिषा' आत्मीयेन प्रकाशेन 'वि ववर्थ' विशिष्टं कृतवानसि । (ववर्थ वृञ् वरणे लिट्थलि, "बभूथा ततन्थ जगृभ्म ववर्थेति" निपात्यते) । १९ ॥

अथ पञ्चमी ।

अग्निमीडे मधुच्छन्दा गायत्र्याग्निसंस्तुति ।

२ १ २   २ १ २   ३ १ २ ३ २   ३ १२
अग्निमीडे*पुरोहितंयज्ञस्यदेवमृत्विजम् ।

१ २   २ १   २
होतारं रत्नधातमम् ॥ २० ॥

'अग्नि' नामकं 'देवम्' 'ईडे' स्तौमि (ईड स्तुताविति धातुः, मन्त्रस्यास्य होत्रा प्रयुज्यमानत्वात् अहं होता स्तौमीति लभ्यते) कीदृशम् अग्निम् ? 'यज्ञस्य पुरोहितं' यथा राज्ञ

---

* "आततनो" "आततन्थ"—इति साम ऋच पाठौ ।

* "मीळे" इति ऋग्वेदपाठः ।

पुरोहितः तदभीष्टं सम्पादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? ‘होतारमृत्विजम्’ (देवानां यज्ञेषु होतृनामकमृत्विजमग्निरेव। तथाच श्रूयते—“अग्निर्वै देवानां होतेति”)। पुनरपि कीदृशम्? ‘रत्नधातमम्’ यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारम् ॥

अथाग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति—“अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति सन्नममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात् स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति (७,४,१”) इति ॥ २० ॥

अथ पञ्चमी।

त्रिष्टुभा वामदेवोऽस्तौदग्निं तेमन्वतेति च।

१ २ ३ २उ ३ २ ३ २ ३ १
तेमन्वतप्रथमन्नामगोनांत्रिःसप्त
३ १ २र ३ २ १ २ ३ १ क २र
रमन्नामजानन्। ताजानतीरभ्यनूष
३ २ ३ १ २ ३ १र ३र ३ १ २
तक्षाआविर्भुवन्नरुणीर्यशसागावः* ॥२१॥

---

*“ताजानतीरभ्यनूषतक्षा आविर्भुवन्नरुणीर्यशसा गावः”—इति छन्दोगाः। “ते मन्वत प्रथमं नाम गोनां त्रिःसप्त परमं

ई 'धर्मे ।' 'ते' स्तोत्र कुर्वाणा अङ्गिरस 'गोनां' गवां वाचां सम्बन्धि नाम स्तुति साधकं शब्द जातं 'प्रथमं' पूर्वम्, 'अमन्वत' अजानन्। अथास्या वाच सम्बन्धीनि 'त्रि सप्त' एकविंशतिसंख्याकानि 'परमं' परमोत्कृष्टानि 'नाम' नामानि स्तुतिसाधकानि स्तोत्राणि (जातावेकवचनम्)। छन्दांसि वा, तानि च गायत्र्यादीनि जगत्यन्तानि सप्त, अतिजगत्यादीनि अतिधृत्यन्तानि सप्त, कृतिप्रभृतीन्युत्कृति पर्य्यन्तानि सप्त) 'जानन्' अजानन् अलभन्त (एवंविधच्छन्दोयुक्तैर्मन्त्रैरेनमस्तुवन्नित्यर्थः) 'ताः' वाच 'जानती' सर्वं जानत्य 'क्षाः' (क्षियन्ति गच्छन्त्यर्थः काश्च प्रापयन्ति ताः) 'अभ्यनूषत' अस्तुवन्। तत्र सूर्य्यस्य 'यशसा' तेजसा सह 'अरुणी' अरुणवर्णाः 'गावः' 'आविर्भुवन्' प्रादुरभुवन्। (यद्वा 'ते' अङ्गिरस 'प्रथमं' पुरातनं 'नाम' एहि सुरभि सुग सु गच्छिनीति धेनु नामधेयम् 'अमन्वत' उच्चारयामास। अथात् ख भूतानि पाणिभिरपहृतानि त्रि सप्त स्तोत्राण्यविन्दन्। तत उच्चारितं जानत्य 'गावः' अभ्यनूषत' हम्भारव लक्षण शब्दमकुर्वत। तदानीमुषा प्रादुरभूदिति ॥२१॥

अथ षष्ठी।

स्तोत्र त्रिष्टुबाग्नेयी दृष्टा गृत्समदेन सा ॥

१ २र ३१ २ १ २ ३ १ २ ३
समन्यायन्त्युपयन्त्यन्याः समानमूर्वं

नाम जानन्। ता जानतीरभ्यनूषत क्षा आविर्भुवन् धेनोस्त्रि परमाणि विन्दन्। तज्जानतीरभ्यनूषत व्रा आविर्भुव दरुणी र्यशसा गो"—इति ऋ ४, १।

३ १र   २   २ ३ २
नद्यस्पृणन्ति। तमूशुचिꣳशुचयोदी
२ ३ २ २ १र ३र २ ३ २ ३ १ २
दिवाꣳसमपान्नपातमुपयन्त्यापः* ॥ २२ ॥

'अन्याः' वर्षाणाम् 'आपः' 'संयन्ति' भूम्यां सङ्गच्छन्ते 'अन्याः' च 'पूर्वं' तत्रावस्थिताः 'उपयन्ति' उपगच्छन्ति। ताः सर्वा आपः 'समानं' सह 'नद्यः' नदी भूत्वा 'ऊर्वं' समुद्रमध्ये वर्त्तमानं वडवानलं 'पृणन्ति' प्रीणयन्ति (पृण प्रीणने तौदादिकः) 'तमु' तमेव 'अपान्नपातम्' 'शुचिं' निर्मलं 'दीदिवांसं' दीप्यमानं [दीदिवेति छान्दसो दीप्तिकर्मा लिटः क्वसुः। वस्वेकाजाद्घसामिति नियमादिडभावः। छन्दसीवेति वक्तव्यमिति वचनाद्द्विर्वचनाभावः। एवंभूतं] 'शुचयः' शुद्धाः 'आपः' 'उपयन्ति' समीपे गच्छन्ति॥

एष हि वैद्युताग्निरूपेण मेघे वर्त्तमानोऽस्मान् घनोऽजनदिति श्रुत्वा वडवानलरूपेण वर्त्तमानं तं पर्य्युपासत इत्यर्थः। यद्वा अन्या एकधनाख्या आपः संयन्ति। चात्वालोत्करयोर्मध्ये वसतीवरीभिः सङ्गच्छन्ते। अन्या वसतीवर्य्याख्या आपश्च उपयन्ति उपरि गच्छन्ति एकमत्यं प्राप्ता भवन्ति। एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्य-वृष्टि-द्वारा नद्यो भूत्वा ऊर्वं पृणन्तीत्यादि समानम्। एवं हि आपो वा अस्पर्द्धन्त वयं पूर्वं यज्ञं वक्ष्याम इत्यादिको बह्वृचब्राह्मणविनियोगाधानमुह्यते॥ २२।

---

* "अपान्नपातमुपयन्त्यापः"—"परितस्थुरापः" इति भाष्यकृतः पाठ-भेदः॥

अथ सप्तमी ।

अस्तौदनुष्टुभा रात्रिं वामदेव ऋचानया ॥

१र　१र२ १ २२ १र १र२ १र　२र
आभागाद्भद्रायुवतिरह्नःकेतूंत्समीर्त्सति ।

१ २२ २ २ १र २ १ २ २१२२१ २
अभूद्भद्रानिवेशनीविश्वस्यजगतोरात्री ॥२३॥

'भद्रा' सूर्य्यप्रकाशसन्ताप निवारयन्ती सुखकरी 'युवति.' तमसो मिश्रयित्री 'रात्रि:' 'आभागात्' आभिमुख्येन प्रगच्छति । 'अह्न.' चन्द्रमस: 'केतून्' रश्मीन् 'समीर्त्संति' सम्यग् बर्धयितुमिच्छति च । अतएव 'भद्रा'कल्याणी रात्री 'विश्वस्य' सर्वस्य 'जगत:' 'निवेशनी' निवेशकारिणी 'अभूत्' भवति । (अहनि स्वस्वव्यापारात् खिन्नान् सर्वप्राणिन: स्वाश्रयेषु स्थापयतीत्यर्थ: ॥ २३ ॥

अथ अष्टमी ।

वैश्वानरं जगत्यास्तौद्भरद्वाजो बार्हस्पत्य: ॥

२१२ १ २　२ २१२उ　२　२२ १र
प्रयस्यवृष्णोअरुषस्यनूमहः प्रनोवचो

२१२ २ १ २　२　१ २ २ १र
विदथाजातवेदसे । वैश्वानरायमतिर्न

२१२ २　१ २　२१२२१२
व्यसेशुचि: सोमइवपवतेचारुरग्नये* ॥२४॥

---

* "प्रयस्य"—"प्रयसा"-इति, "मह:"-"सह:"-इति, "प्रनोवोच"-"प्र नु वोचम्"-इति, "जातवेदसे"-"जातवेदस"-इति, "नव्यसे" "नव्यसि"-इति च साधारणत: पाठ-भेद: ॥

‘पृक्षस्य’ संहतस्य व्याप्तस्य (यद्वा पृक्षं हविरन्नमत्र वहतः) ‘वृष्णः’ सेक्तुः ‘अरुषस्य’ आरोचमानस्य ‘वैश्वानराय’(४) ‘महः’ पूजायुक्तं बलं तेजो वा ‘नु’ क्षिप्रं स्तौमि। अतएव ‘नः’ अस्मदीयं ‘वचः’ वचनं ‘विदथे’ यागे ‘प्रयच्छामि’ स्तौमीत्यर्थः। ‘जातवेदसे’ जातप्रज्ञाय जातधनाय वा तमुद्दिश्येत्यर्थः। (उक्तमेव प्रकारान्तरेणादरादाह) ‘नव्यसे’ नवतराय ‘वैश्वानराय’ अग्नये ‘शुचिः’ निर्मला स्तोतॄणां शोधयित्री वा। ‘चारुः’ कल्याणी ‘मतिः’ मननीया स्तुतिः ‘पवते’ अस्मत्सकाशात् प्रभवति स्वयमेव गच्छतीत्यर्थः। ‘सोम इव’ यथा सोमो दशापवित्रात् स्रवति तद्वदित्यर्थः ॥२४॥

अथ नवमी ।

एषा त्रिष्टुप् वैश्वदेवी भरद्वाजेन वीक्षिता ।

१ २ ३ १र २र ३ २ ३ १र २र ३ १र
विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपान्न
२र ३ १ २ ३ १ २ ३ १ २
पाच्च मन्म । मा वो वचांसि परिचक्ष्याणि
१ २उ ३ १ २
वोचꣳ सुम्नेष्विद्वो अन्तमा मदेम ॥ २५ ॥

‘विश्वे’ सर्वे ‘देवाः’ ‘मम’ मदीयं ‘मन्म’ मननीयं ‘यज्ञ’* यजनीयं पूजां स्तोत्रादि वा ‘शृण्वन्तु’ गृह्णन्त्वित्यर्थः। ‘अपां नपात्’ मध्यस्थानोऽग्निश्च ‘उभे रोदसी’ द्यावापृथिव्यौ चास्मदीयं स्तोत्रं शृण्वन्तु चित्ते अवधारयन्तु।

---

* “यज्ञ”—“यज्ञियाः”-इति पाठौ ।

(४) वैश्वानरः कस्मात् विश्वान् नरान् नयति इत्यादि नैरुक्तम् ७,२१ ।

अथ प्रत्यक्ष-कृता:।—हे देवा:’। ‘व:’ युष्माकं ‘परिचक्ष्याणि’ परिवर्जनीयानि यानि ‘वचांसि’ स्तोत्राणि ‘मा वोच’ न ब्रवीमि। अपितु समीचीनानीति। अत:, वो युष्माकम् ‘अन्तमा:’ अन्तिकतमा: सन्तो वयं ‘सुम्नेष्वित्’ सुखाभिधानेषु सुखेष्वेव वर्त्तमाना: ‘मदेम’ मोदेम ॥ २५ ॥

अथ दशमी।

वामदेवो महापङ्क्त्या स्तौति लिङ्गोक्तदेवता:।

१ २ २ १ २ २ १र ३र १ २
यशोमाद्यावापृथिवीयशोमेन्द्रबृहस्पती।
२ १ २ ३ १ २ ३ १ २
यशोभगस्यविन्दतुयशोमाप्रतिमुच्यताम्।
२ ३ २ ३ २ ३ १ २ ३ १ २
यशस्या३:स्या:सꣳसदोहंप्रवदितास्याम् ॥२६॥

‘द्यावापृथिवी’ द्यावापृथिव्यो: ‘यश:’ ‘मा’ स्तोतारम् ‘आविन्दतु’ लभतां प्राप्नोत्वित्यर्थ:। किञ्च, ‘इन्द्रबृहस्पती” इन्द्राबृहस्पत्यो: ‘यशो’ ‘मा’ मां विन्दतु। किञ्च, ‘भगस्य’ आदित्यस्य ‘यश:’, ‘मा’ मां विन्दतु। बहुलेन यशसा यशो मया ‘मा प्रतिमुच्यतां’ न प्रमुच्यताम्। ‘यशसस्या:’ अस्या: मम ‘संसद:’ समूहस्य ‘यश:’ न प्रमुच्यताम्। ‘अहं’ प्रवदिता सर्व्वस्य वक्ता ‘स्याम्’ भूयासम् ॥ २६ ॥

अथ एकादशी।

दृष्टा हिरण्यस्तूपेन त्रिष्टुबैन्द्रदेवता।

१ २ १ ० ३ १र २ १ २ २ १ २ १ १ ०
इन्द्रस्यनुवीर्याणिप्रवोचंयानिचकार

२१ २ २ १ १ । २ २ ।२
प्रथमानिवज्री । अहन्नहिमन्वपस्त
२ १२ १ २ १ १ २ १ २
स्तर्दंप्रवक्षणाअभिनत्पर्वतानाम् ॥२७॥

'वज्री' वज्रयुक्त इन्द्रः 'प्रथमानि' पूर्वसिद्धानि मुख्यानि वा 'यानि' 'वीर्याणि' पराक्रमयुक्तानि 'कर्माणि' चकार। तस्य 'इन्द्रस्य' तानि वीर्याणि। 'नु' क्षिप्रं 'प्रवोचं' प्रब्रवीमि। कानि वीर्याणीति? तदुच्यते—'अहिं' मेघम् 'अहन्' हतवान्। तदेतदेकं वीर्यम्। 'अनु' पश्चात् 'अपो' जलानि 'ततर्द' हिंसितवान् भूमौ पातितवानित्यर्थः। इदं द्वितीय वीर्यम्। 'पर्वतानां' सम्बन्धिनीः 'वक्षणाः' प्रवहणशीला नदीः 'प्राभिनत्' कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीय वीर्यम् ॥ २७ ॥

अथ द्वादशी ।

विश्वामित्रऋषिस्त्रिष्टुप्छन्दस्त्वग्निरिति द्वयोः ।
उत्तराग्नेः स्तुतिः पूर्वा स्तुतिः सर्वात्मनात्मनः ॥

१ १ २ १ १ २ १ १ २ १ ३र २र
अग्निरस्मिजन्मनाजातवेदाघृतंमेचक्षु
२ १ २ १ २ २ १ २ १ ३र २ २
रमृतंमआसन् । त्रिधातुरर्कोरजसो
२ ३र २३ २ २ १ २ २ १ २
विमानोऽजस्र०ंज्योतिर्हविरस्मिसर्वं ॥२८॥

---

० "अजस्र"-"घर्मः"-इति साम्न ऋच. पाठ-भेदः ।

साक्षात्कृत परतत्त्व स्वरूपोऽग्निः स्वात्मनः सर्वात्मना सर्वात्मकत्वानुभवम् अनयार्चा आविष्करोति—

हे कुशिकाः। भोक्तृ भोग्य भावेन द्विविधम् इदं सर्वं जगत्। "एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः" इति श्रुतेः। तत्र सकल भोक्तृ-वर्ग रूपेणान्नादोऽग्निः। स च अग्निवाय्वादित्य भेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्ष-द्युलोकानधितिष्ठति। तदुक्तं वाजसनेयके—"स त्रेधात्मानं व्यकुरुतादित्यं द्वितीयं वायुं तृतीयम्" इति।

तत्र सो 'ऽग्निः' अहं 'जन्मना' एव 'जातवेदाः' 'अस्मि' श्रवणमननादि साधन नैरपेक्ष्येण स्वभावत एव साक्षात्कृत पर तत्त्वस्वरूपोऽस्मि। 'घृतं मे चक्षुः' यदेतद्विश्वस्यावभासक मम स्वभावभूतप्रकाशात्मकं चक्षुः तद् घृतम् इदानीमत्यन्त दीप्तम्। यदेतद् 'अमृतं' कर्मफलं दिव्यादि विविध-विषयोपभोगात्मकं तन्मे मम 'आसन्' आस्ये वर्त्तते। सकल-भोक्तृ वर्गात्मना स्वयमेवावस्थानात्। (एवं स्वात्मनः पृथिव्यधिष्ठातृ रूपता मभिधाय वाय्वात्मनान्तरिक्षाधिष्ठातृतामाह) 'अर्कः' जगतः स्रष्टा प्राणः। "सोऽर्चन्नचरत्तस्यार्चत आपो जायन्तार्चते वै कमभूदिति तदेवार्कस्यार्कत्वमिति श्रुतेः। स प्राणः अहं 'त्रिधातुः' त्रिधात्मानं विभज्य तत्र वाय्वात्मना 'रजसः' अन्तरिक्षस्य 'विमानः' विमाता अधिष्ठातास्मि। (तथा आदित्यरूपस्य द्युलोकाधिष्ठातृतामाह—) 'अजस्रं ज्योतिः' अनुपक्षीणं नित्यं तेजः प्रकाशात्मा द्युलोकाधिष्ठाता आदित्योऽप्यहं अस्मि। (एवं भोक्तृ रूपता मात्मनोऽनुसन्धाय भोग्य रूपता मप्यनुसन्धत्ते। यत् हविर्भोग्यं प्रसिद्धमस्ति तत्सर्वं अप्यहं एवास्मि॥

यद्वा। अहं 'अग्निः' रक्ष्यः देवानां हविः प्रापणात् अह

नादिगुण-युक्तोऽस्मि। किञ्च, 'जन्मना' उत्पत्त्या 'जातवेदाः' जातप्रज्ञोऽस्मि। उत्पत्ति-क्षण एव सर्वज्ञोऽहं अस्मि। यद्वा जातं सर्वं स्वात्मतया वेत्तीति जातवेदाः सर्वात्मक इत्यर्थः। तत् कथम्? इत्युच्यते—'घृत' मे चक्षुः यदेतद् घृतं प्रसिद्धमस्ति तन्मे चक्षुः-स्थानीयम्, यथा लोके चक्षुर्भासकम् एवं घृतमपि प्रक्षिप्तं ज्वालामुत्पादयत् मम भासकम्। 'अमृतं' प्रभारूपं। यदमृत मविनाशि ज्योतिः 'मे' मम 'आसन्' आस्ये वर्त्तते। 'त्रिधातुः' प्राणापानव्यानात्मकस्त्रिधा वर्त्तमानोऽर्कोऽर्चनीयो यः प्राणोऽस्ति सोऽप्यहमेवास्मि। तथा 'रजसः' अन्तरिक्षस्य 'विमानः' विशेषेण माता परिच्छेत्ता वायुश्चाहमस्मि। किञ्च। 'अजस्रं ज्योतिः' नैरन्तर्य्येण तापकः सूर्य्यश्चाहमस्मि। किं बहुना। आज्य-पुरोडाशादि-रूपं यदेतद्धवि रस्ति तदुपलक्षित तत्सर्वं मप्यहमस्मि ('सर्वं खल्विदं ब्रह्मेति श्रुतेः) तमनेकधा अग्नेः सर्वात्मकत्व-प्रतिपादनेन परब्रह्मत्व मुक्तं भवति॥ २८॥

अथ त्रयोदशी।

३ २ १ ३ १र ३र २ १र ३र २ १र
पात्यग्निर्विपो अग्रं पदं वेः पाति यह्व-
३र १ १ २ ३ १ २ ३ १ २
श्चरणं सूर्यस्य। पाति नाभा सप्तशीर्षा-
३ १र ३र २ १ २ ३ १ ३ १ २
णमग्निः पाति देवानामुपमादमृष्वः॥ २९॥

'अग्निः' 'वेः' गन्तुः सर्वत्र व्याप्तायाः 'विपः' भूम्याः

---

* "पात्यग्निर्विपो अग्र"-"पाति प्रियं रिपो अग्रम्"-इति

'अग्रं' मुख्यं 'पदं' स्थानं 'पाति' रक्षति । 'यह्वः' महान् अग्निः 'सूर्यस्य' 'चरणं' चरत्यनेनेति चरणमन्तरिक्षं 'पाति' । 'नाभा' नाभौ अन्तरिक्षस्य मध्ये 'सप्त शीर्षाणं' सप्तगणं मरुद्गणं 'पाति' । 'ऋष्वः' दर्शनीयोऽयम् 'अग्निः' 'देवानाम्' 'उपमादम्' उपमादकं यज्ञं 'पाति' रक्षति ॥ २९ ॥

इति तृतीयः खण्डः ।

अथ—चतुर्थखण्डे—

सैषा प्रथमा ।

वामदेवऋषिः पंक्तिर्भ्राजन्त्यग्न इति द्वयोः ।
आग्नेयी प्रथमसंख्या द्वितीया दृश्यते तयोः ॥

१ २ २ १ २ ३
भ्राजन्त्यग्नेसमिधानदीदिवोजिह्वाचरत्यं
३ २ १ २ १र २र ३ १ २ ३ २ ३ १र
तरासनि । सत्वंनोअग्नेपयसावसुविद्रयिं
२र ३ १ २
वर्चोदृशेऽदाः ॥ ३० ॥

'समिधान' ऋत्विग्भिः समिध्यमान ! दीप्त ! हे 'अग्ने' ! 'भ्राजन्ती' प्रकाशमाना 'आसनि' आस्ये 'अन्तर्' मध्ये स्थिता त्वदीया 'जिह्वा' हवींषि 'चरति' भक्षयति । हे 'अग्ने' ! 'वसुवित्' ! धनलम्भक ! त्वं 'नः' अस्मभ्यं 'पयसा' अन्नेन सह 'रयिं' रमणीयं धनं 'दृशे' दर्शनाय 'वर्चः' तेजश्च तेजस्वित्वं वा 'अदाः' देहि ॥ ३० ॥

अथ द्वितीया ।

१ २र २र ३ १र ३र १ २र ३र
वसंतइन्नुरंत्योग्रीष्मइन्नुरंत्यः । वर्षाण्यनु
१ २ १ २र ३र १ २र ३र
शरदोहेमंतःशिशिरइन्नुरंत्यः ॥ ३१ ॥

'वसन्तः इत् नु' वसन्त एव चैत्र-वैशाखरूपवसन्त ऋतुरेव 'रन्त्यः' रमणीयः भवति । 'ग्रीष्म इत् नु' ज्येष्ठाषाढरूपो ग्रीष्मऋतुरेव 'रन्त्यः' रमणीयः । 'वर्षाणि' वर्षाः श्रावण भाद्रपदरूपेणावयवीभूतः प्रावृट् ऋतुरेव 'रन्त्यः' रमणीयः । 'तथानु' 'शरदः' आश्विनकार्त्तिकरूपेणावयवीभूतऋतुः 'रन्त्यः' रमणीयः । 'हेमन्तः' मार्गशीर्ष-पौषरूप एव 'रन्त्यः' रमणीयः । 'शिशिर इत् नु' माघ-फाल्गुनरूप एव 'रन्त्यः' रमणीयः ॥ १ ॥

अथ तृतीया ।

१ २ ३ १ २ १ ३ १ २र ३
सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
२र ३र ३ १ २ ३ १ ३ २ ३
सभूमिंसर्वतो (१) वृत्वात्यतिष्ठद्दशांगुलम् ॥ ३२ ॥

सर्व-प्राणि-समष्टि-रूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं 'सहस्रशीर्षाः' (अत्र सहस्रशब्दस्योपलक्षणत्वात्) अनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षत्वं सहस्रपादत्वं च । स पुरुषः 'भूमिं' ब्रह्माण्ड-गोलक-रूपां सर्वत 'वा' समन्तात् 'वृत्वा' परिवेष्ट्य दशाङ्गुलपरिमितं देशम् 'अत्यतिष्ठत्' अतिक्रम्य व्यवस्थितः ।

---

(१) "स्पृत्वा" इति क॰ ।

(दशाङ्गुलमित्युपलक्षणं) ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥ २२ ॥

अथ चतुर्थी ।

२ २ २ २उ १ १ २ ३ १ २ ३ १ २ २ १ २
त्रिपादूर्द्ध्वँ उदैत्पुरुषःपादोऽस्येहाभवत्पुनः ।
३ १ क २र २ २ ३ २
तथाविष्वङ्व्यक्रामदशनानशनेअभि(२) ॥२३॥

योऽयं 'त्रिपात् पुरुषः' संसारस्पर्श-रहितः ब्रह्मस्वरूप सोऽयम् 'ऊर्ध्वं उदैत्' अस्मादज्ञान कार्य्यात्संसाराद्बहिर्भूतः सन् अत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् । 'अस्य' योऽयं 'पादः' लेशः सोऽयमिह मायायां पुनरभवत् । सृष्टि-संहाराभ्यां पुनः पुनरागच्छदिति (अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति") तथा मायायामागत्यानन्तरं 'विष्वङ्' देव तिर्य्यगादि-रूपेण विविधः सन् 'व्यक्रामत्' व्याप्तवान् । किं कृत्वा ? 'अशनानशने' अभिलक्ष्य अशनं भोजनादि व्यवहारोपेतं चेतनं प्राणि-जातम्, अनशनं तद्रहितमचेतनं गिरि-नद्यादिकम् । तदुभयथा यथा स्यात्तथा अयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥ २३ ॥

अथ पञ्चमी ।

१ २ २ ३उ १ २ ३ १उ ३ १ २
पुरुष(३)एवेदꣳसर्वं यद्भूतंयच्चभाव्यम्(४) ।

---

(२) "ततो विष्वङ् व्यक्रामत् साशनानशने अभि" ऋ०

(३) "पुरुषएवेद"—(४) "यच्च भव्यम्"—

१ २ २ १ २ ३१ १ २ १३२ १ १२ १
पादोऽस्यसर्वाभूतानित्रिपादस्यामृतंदिवि(५) ॥३४॥

यत् 'इदं' वर्त्तमानं जगत् तत् 'सर्वं' 'पुरुष एव'। 'यद्भूतम्' उत्पन्नं जगत् 'यच्च भाव्यं' भविष्यज्जगत् तदपि पुरुष एव। यथास्मिन् काले वर्त्तमानाः प्राणिनः सर्व्वेऽपि चराचरात्मकपुरुषस्यावयवाः तथैव गतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः। एतदेवोभयं स्पष्टीक्रियते—'अस्य' पुरुषस्य 'सर्वाणि भूतानि' कालत्रयवर्त्तीनि प्राणि·जातानि 'पादः' चतुर्थोऽंशः। 'अस्य' पुरुषस्यावशिष्टं 'त्रिपात्' स्वरूपम् 'अमृतं' 'विनाशरहितं' सत् 'दिवि' द्योतनात्मके स्व प्रकाशस्वरूपे व्यवतिष्ठत इति शेषः। (यद्यपि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यनन्तस्य परब्रह्मणो ह्येयत्त्वाभावात् पादचतुष्टयं निरूपयितुमशक्यं, तथापि जगदिदं ब्रह्म·स्वरूपापेक्षया अल्पमिति विवक्षितत्वात् पादत्वोपचार ॥ १४ ॥

अथ षष्ठी।

१ २ ३ २उ ३ १ २ ३ १ २
तावानस्य(६)महिमाततो(७)ज्यायाꣳश्चपूरुषः(८)
२ ३ १ २ ३ १र २र ३ १र १र ३ १ २
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥३५॥

अतीतानागतवर्त्तमान रूप जगदाद्याधारो योऽस्ति 'तावान्' सर्वोऽपि 'अस्य' पुरुषस्य 'महिमा' स्वकीय·सामर्थ्य·

---

(५) "उतामृतत्वेत्यादि" ऋ०।

(६) "एतावानस्य"—(७) "अतोज्यायांश्च"—

(८) "पादोऽस्येत्यादि" ऋ०

विशेषः । न तु तस्य वास्तवं स्वरूपम् । वास्तवस्तु 'पुरुषः' 'ततो' महिम्नोऽपि 'ज्यायान्' अतिशयेनाधिक इत्यर्थः । 'उत' अपि च 'अमृतत्वस्य' देवत्वस्य 'अयम् ईशानः' स्वमायया 'यत्' यस्मात् कारणात् 'अन्नेन' प्राणिनां भोग्येन अन्नेन निमित्तभूतेन 'अतिरोहति' स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारात् नेदं तस्य वस्तुतत्त्वमित्यर्थः । २५ ॥

अथ सप्तमी ।

१ २ ३ १ २ २ २ २ १ २ १ २
ततो(८)विराडजायतविराजोअधिपूरुषः ।
२ १र २र २ ३उ ३ १ २ २ २
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥२६॥

"विष्वङ् व्यक्रामत्" इति यदुक्तं तदेवात्र प्रपञ्च्यते-'ततः' तस्मादादिपुरुषात् 'विराट्' ब्रह्माण्डदेहः 'अजायत' उत्पन्नः । (विविधानि राजन्ते वस्तून्यत्रेति विराट्) 'विराजो अधि' विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा 'पूरुषः' तद्देहाभिमानी कश्चित्पुमानजायत । योऽयं सर्ववेदान्तवेद्यः परमात्मा स एव स्वकीयया मायया विराड्देहं ब्रह्माण्ड-रूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् (एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति—"स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य मूढो मूढ इव व्यवहरन्नास्ते माययैवेति") 'स जातः' विराट्पुरुषः 'अत्यरिच्यत' अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभवत् । पश्चाद्देवादिजीव

---

(८) "तस्माद्" ऋ० ।

भवादूर्ध्वं भूमिं ससर्जेति शेषः। 'अथो' भूमि-सृष्टेरनन्तरं तेषां जीवानां 'पुरः' ससर्ज [पूर्य्यन्ते सप्तभिर्धातुभिरिति पुरः] शरीराणि । २६ ॥

मन्ये वामिति पञ्चर्चो वामदेवेन वीक्षिताः ।
अथाद्यैकाग्निमे च द्वे त्रिष्टुभस्तासु चादिमा ॥
उपरिष्टाज्ज्योतिरिति बृहत् चैव विधीयते ।
अन्ये अनुष्टुभौ द्यावापृथिव्योः प्रथमा तथा ॥
द्वितीयैन्द्री चतुर्थी च तृतीयाग्नेर्निजात्मनः ।
स्तुतिर्गवामन्तिमेति छन्दोदैवत निर्णयः ॥

अथ अष्टमी ।

वामदेवऋषिः । त्रिष्टुप्छन्दः । द्यावापृथिवी देवते ।

१ २ २ ३ २ ३ १र ३र २ ३
मन्येवांद्यावापृथिवीसुभोजसौयेअप्रथेथाम
२ ३ १र ३र १ २ ३ १ २
मितमभियोजनम् । द्यावापृथिवीभवतꣳ
२ ३र ३र २ ३ १
स्योनेतेनोमुञ्चतमꣳहसः ॥२७॥

हे 'द्यावापृथिवी' द्यावापृथिव्यौ ! 'वां' युवां 'सुभोजसौ' शोभनपालयितारौ इति 'मन्ये' अहं जानामि हे द्यावापृथिव्यौ 'अमितम्' अपरिमितं 'योजनं' [युज्यते पुरुषोऽनेनेति योजनं] धनादि तत् 'अभ्यप्रथेथाम्' अभिविस्तारयतम् हे 'द्यावापृथिवी' द्यावापृथिव्यौ ! युवां अस्माकं 'स्योने' सुखरूपे स्वसुखकार्य्ये 'भवतम्' 'ते' द्यावापृथिव्यौ 'नः' अस्मान् 'अंहसः' पापात् 'मुञ्चतं' मोचयतम् । २७ ॥

अथ नवमी ।

अनुष्टुप्छन्दः । इन्द्रो देवता । वामदेव ऋषिः ।

१ २ २ १ २ २ ३ २ २ १ २ १ २
हरीतइन्द्रश्मश्रूण्युतोतेहरितौहरी ।
१ २ २ १ २ २ १ २ २ १ २
तंत्वास्तुवन्तिकवयःपुरुषासोवनर्गवः ॥३८॥

हे ‘इन्द्र’ । ‘ते’ तव ‘श्मश्रूणि’ ‘हरी’ सोमपानेन हरित वर्णानि’ [तथाच श्रूयते—‘इन्द्र श्मश्रूणि हरितानि प्रधान’ इति । “शेश्छन्दसि बहुलम्” इति हरि शब्दात्परस्य शेर्लुक्] ‘उतो’ अपिच । ‘ते’ ‘हरी’ अश्वौ ‘हरितौ’ हरिद्वर्णौ । ‘कवय’ मेधाविन ‘पुरुषास’ पुरुषा ‘वनर्गव’ वननीया सम्भजनीया सेवनीया गावो येषां ते वनर्गव [मध्यरेफश्छान्दसः । गोस्त्रियोरिति ह्रस्वत्व] तादृश कवय ‘तं’ ‘त्वा’ त्वां स्तुवन्ति ॥ ३८ ॥

अथ दशमी ।

वामदेव ऋषिः । अनुष्टुप्छन्दः । आयामने विनियोज्या ।

२उ ३ १ २ २ ३ २ ३ ३ १ २ २ २ २ १
यद्वर्चोहिरण्यस्ययद्वावर्चोगवामुत । सत्यस्य
१ २ २ २ २ १ ३ २ ३ १
ब्रह्मणोवर्चस्तेनमासꣳसृजामसि ॥३९॥

‘हिरण्यस्य’ हित रमणीयस्य एतन्नामकस्य ‘यद्वर्चं’ तेजोऽस्ति । ‘यद्वा’ अपिच । ‘गवाम्’ एतन्नामकानां ‘यद्वर्चं’ तेजोऽस्ति । ‘उत’ अपिच । ‘सत्यस्य’ सर्वैः सम्मतस्य ‘ब्रह्मण’ यद्वर्चोऽस्ति तेन तै ‘मा ‘संसृजामसि’ सम्पादयाम’ । धन धान्य पशुमन्त्र योगिया भवेमेति तात्पर्य्यार्थं ॥ ३९ ॥

अथ एकादशी।

२ १ २ ३ २ ३ १ २क २र १ २
सहस्तंनइन्द्रदध्योजईशेह्यस्यमहतोविरप्-
३ २ ३ १२ २र ३ १ २ ३२३ १
शिन्। क्रतुन्ननृम्णᳬस्थविरंचवाजंवृत्रेषुश
३ ३ १ २
त्रून्त्सुहनाकृधिनः ॥४०॥

हे 'विरप्शिन्'! विशेषेण रपणं सत्य वचनं तदस्यास्तीति विरप्शी, तस्य सम्बोधनं हे विरप्शिन्! विशेषेण स्तोत्रविषये सत्यवाक्य। 'इन्द्र'! 'त्वं' तव 'सहः' शत्रूणामभिभवनरूपम् 'ओजः' बलं 'नः' अस्मभ्यं 'दधि' (ददातेश्छान्दसं रूपं लोडि हेर्धिभावादिना) यस्मात् त्वं तस्य 'अस्य' 'महतः' बलस्य 'ईशे' ईश्वरो भवसि। अतो हे इन्द्र! 'नः' अस्माकं 'क्रतुं न' यज्ञमिव 'नृम्णं' धनं 'स्थविरम्' अतिशयेन प्रवृद्धं "वाजं" बलं च 'कृधि' कुरु। किञ्च नोऽस्माकं 'शत्रून्' 'वृत्रेषु' आवरकेषु उपायेषु 'कृधि' कुरु ॥ ४० ॥

अथ द्वादशी।

२ १ २ ३ १ २ ३ २ ३ १ २ ३ २ २ ३
सहर्षभाःसहवत्साउदेतविश्वारूपाणिबिभ्र
३ २ ३ २ ३ १ २ ३ ३ १ २र
तीर्द्व्यूध्नीः। उरुःपृथुरयंवोअस्तुलोकइमा
२र ३ २ ३ १ २
आपःसुप्रपाणाइहस्त ॥४१॥

हे 'सहर्षभाः'! ऋषभैः सहिताः! 'सहवत्साः'! वत्सैः

सहिता' ; गाव: ! 'द्व्यूध्नी.' सायं प्रात. काले द्विविधान्यूधांसि यासां ता द्व्यूध्नी द्व्यूध्न्य । 'विश्वा' सर्वाणि नानारूपाणि 'बिभ्रती.' बिभ्रत्य, यूयम् 'उदेत' उद्गच्छत समृद्धा. सत्य. आगच्छत । किञ्च । 'उरु' बहु 'पृथु' विस्तीर्णं (उरु पृथुरिति शब्दाभ्याम् आयाम-विस्तारौ उच्येते । 'अयं लोक' 'व' युष्माकम् 'अस्तु' भवतु । 'इमा आप.' 'इह' लोके भूतले अस्मिन् स्थाने 'सुप्रपाणा.' सुखेन प्रकर्षेण पातुं योग्या' सन्तु तस्मादिह वशीभूता. 'स्त' भवत उपविशतेति पूर्वेण सम्बन्ध ॥ ४१ ॥

इति चतुर्थः खण्डः ।

अथ पञ्चमे खण्डे—

अथ प्रथमा ।

चतुर्दशाग्न आयूंषीत्याद्यासाञ्च जगत्यसौ ।
विश्वादृत्रिष्टुप्चित्रमिति गायत्र्यो द्वादशेतरा ।
आद्याग्ने पवमानस्य स्तुति सौर्यस्तथोदय ।
ऋषीणां विप्रकीर्णत्वात्तन्नाभिदध्महे ।
अतो वैखानसा एव दृष्टवन्तो महर्षय: ।

१ २ १ २ ३ २ ३ र १ २
अग्न आयूंषि पवस आसुवोर्जमिषं च न: ।
२ १ १ १ १ २
आरे बाधस्व दुच्छुनाम् ॥४२॥

हे 'अग्ने' । पवमान रूप ! अस्माकमायूंषि अस्माचैतराम कानि मा 'पवसे' क्षरसि 'न:' अस्माकम् 'ऊर्जम्' रसरसेन

'इषम्' अन्नं च 'आसुव' आभिमुख्येन प्रेरय। किञ्च। 'दुच्छुनाः' (रक्षोनामैतत्) रक्षांसि 'आरे' अस्मत्तो दूर एव 'बाधस्व' सम्पीड्य॥ ४२॥

अथ द्वितीया।

विभ्राण्नामक एता तु सूर्य्यपुत्रो ऋषिः सः।

१ ३ २ १ २ १ २उ २ । २ १ । १ २
विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता
३ २ ३ १ २र ३ । २ २ ३ १ २ । ० ३ १
वविह्रुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः
१ २ ।३ १र
पिपर्त्ति बहुधा विराजति ॥४३॥

'विभ्राट्' विभ्राजमानः विशेषेण दीप्यमानः सूर्यः 'बृहत्' परिवृढं 'सोम्यं' सोममयं 'मधु' पिबतु। किं कुर्वन्? 'यज्ञपतौ' यजमाने 'अविह्रुतम्' अकुटिलम् अकण्टकम् आयुः 'दधत्' अन्नं वा कुर्वन्। 'यः' सूर्यः 'वातजूतः' वातेन वायुना प्रेर्यमाणः सन् 'त्मना' आत्मना स्वयमेव अभिरक्षति सर्वं जगदभिरक्षन् पालयति (रश्मिचक्रस्य वायुप्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्) स सूर्यः 'प्रजाः' 'पिपर्त्ति' (१०) इष्टादि प्रदानेन पूरयति पालयति वा 'बहुधा' 'विराजति' विशेषेण दीप्यते च॥ ४२॥

अथ तृतीया।

कुत्सः।

१ ३ १ २ १ ।२ ३ । ० १ । २ २ २ ३ १ २
मित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुण-

---

(१०) 'पिपर्त्ति"-"पृणोति"-इति, "बहुधा" "पुरुधा" इति च पाठौ॥

३ २ २ १ २र २ २ ३ १ २ ३ १
स्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षꣳ सू-
२ ३ १र २र २ १ २
र्य आत्मा जगतस्तस्थुषश्च ॥४४॥

'देवानां' दीव्यन्तीति देवा रश्मयः, तेषां देवानामेव वा प्रसिद्धानाम् 'अनीकं' तेजःसमूह रूपं 'चित्रम्' आश्चर्य्य-करं सूर्य्यमण्डलम् 'उदगात्' 'उदयाचलं प्रयासीत्। कीदृशं? 'मित्रस्य वरुणस्याग्नेश्च' (चक्षुरुपलक्षणमेतत्) एतदुपलक्षितानां जगतां 'चक्षुः' प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा। उदयं प्राप्यैव 'द्यावापृथिवी' दिवं च पृथिवीं च अन्तरिक्षं च 'आप्राः' स्वकीयेन तेजसा 'आ' समन्तात् अपूरयत्। ईदृग्भूत मण्डलान्तरवर्ती सूर्य्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा 'जगतः' जङ्गमस्य 'तस्थुषश्च' स्थावरस्य च 'आत्मा' स्वरूप-भूतः स हि सर्वस्य स्थावर-जङ्गमात्मकस्य कार्य्य-वर्गस्य (कारणाच्च कार्य्यं नातिरिच्यते। तथाच पारमर्षसूत्रं—"तदनन्यत्वमारम्भणशब्दादिभ्यः"-इति। यद्वा। स्थावर-जङ्गमात्मकस्य सर्वप्राणि जातस्य जीवात्मा। उदिते हि सूर्य्ये मृतप्रायं सर्वं जगत् पुनश्चेतन-युक्तं सत् उपलभ्यते। तथाच श्रूयते—"योऽसौ तमो दुदेति सर्वेषां भूतानाम्। प्राणानादायोदेतीति ॥ ४४ ॥

अथ चतुर्थी।

आयङ्गौः पृश्निरित्यस्य सार्पराज्ञी समैक्षत।
ऋचस्तिस्रो भवेदासां विकल्पेनात्मदेवता ॥

१र २र २ ३ १ २ ३ १ २
आयंगौःपृश्निरक्रमीदसदन्मातरं

२ २   २ ० १ २   २ १ २

पुरः। पितरंचप्रयन्त्स्वः ॥४५॥

। 'गौः' गमनशील 'पृश्निः' प्राष्टवर्ण व्याप्ततेजा 'अयं' सूर्य्यं 'आक्रमीत्' आक्रान्तवान् उदयाचल प्राप्तवानित्यर्थः। आक्रम्य च 'पुरः' पुरस्तात् पूर्वस्यां दिशि 'मातरं सर्वस्य भूतजातस्य निर्मात्रीं 'भूमिम्' 'असदत्' आसीदति प्राप्नोति (सदेश्छान्दसो लेट्। इरितत्वात् च्लेरङादेशः) तत 'पितरं' पालक द्युलोक, 'च' शब्दादन्तरिक्षं 'प्रयन्' प्रकर्षेण शीघ्र गच्छन् 'स्वः' सु अरण शोभन गमनो भवति। यद्वा। पितरं स्वर्लोकं प्रवर्त्तते॥ ४५॥

अथ पञ्चमी।

२ १ २   १७ २ १ २ १२

अन्तश्चरतिरोचनास्यप्राणादपानती।

१७   २ १र   १र

व्यख्यन्महिषोदिवम् ॥४६॥

'अस्य' सूर्य्यस्य 'रोचना' रोचमाना दीप्तिरन्तः शरीर मध्ये मुख्य प्राणात्मना 'चरति' वर्त्तते। किं कुर्वती? 'प्राणादपानती' (मुख्य प्राणस्य प्राणाद्या पञ्च वृत्तय। तत्र प्राणनं नाडीभिरूर्ध्वं वायोर्निर्गमनं) तथाविधात्प्राणात् प्राणनादनन्तरम् अपानती (अपाननं नाडीभिरवाङसुखं वायोर्नयनं) तत् कुर्वती (अपपूर्वादनितेर्लट् शतृ, अदादित्वाच्छपो लुक्। उगितश्चेति ङीप्। शतुरनुम इति ङ्या उदात्तत्वम्)।

यद्वा। 'अन्तः' द्यावापृथिव्योर्मध्ये "अस्य" सूर्य्यस्य "रोचना" रोचमाना दीप्तिः "चरति" गच्छति (रुच दीप्तौ।

अनुदात्तेतश्च हलादेरिति युच्) किं कुर्वती ? ,"प्राणात्" प्राणनादुदयादनन्तरम् 'अपानती' सायाह्नसमये अस्तङ्गच्छन्ती। (ईदृश्या दीप्त्या युक्त) अतएव 'महिष' महान् सूर्य 'दिवम्' अन्तरिक्षं उदयास्तमययोर्मध्ये 'व्यख्यत्' विचष्टे प्रकाशयति (महेरिच महेष्टिषचिति औणादिकष्टिषच्प्रत्ययः। चक्षिङ ख्याञ् छान्दसे लुङि अस्यतिवक्तिख्यातीत्यादिना च्लेरङादेशः ॥४६॥

अथ षष्ठी।

३ २उ ३ १२ ३ १ २ ३ १ २
त्रिंशद्धामविराजतिवाक्पतंगायधी
२ ३ २ ३ २ १ २
यते। प्रतिवस्तोरहद्युभिः ॥४७॥

'त्रिंशद्धाम' धामानि स्थानानि (वचनव्यत्ययः) 'वस्तो' वासरस्य अहोरात्रस्यावयवभूतानि। 'अह' शब्दोऽवधारणे। 'द्युभि' सूर्यस्य दीप्तिभिरेव विराजति विराजते विशेषेण दीप्यते (व्यत्ययेनैकवचनम्। मुहूर्त्तान्येव धामान्युच्यन्ते। पञ्चदशाहे पञ्चदशाह्न) 'पतङ्गाय' पतति गच्छतीति पतङ्ग सूर्य तस्मै सूर्याय स्तुतिरूपा 'वाक्' 'प्रतिधीयत' प्रतिमुखं स्तोतृभिर्विधीयते क्रियते [यद्वा वस्तो' अह 'त्रिंशत् 'धाम' धामानि (घटिकाभिप्रायमेतत्) त्रिंशद्घटिका (अत्यन्तसंयोगे द्वितीया) एतावत्कालं 'द्युभि' दीप्तिभिरसौ सूर्य 'विराजति विशेषेण दीप्यते। तस्मिंश्च समये 'वाक्' त्रयीरूपा तस्मै 'पतङ्गाय' 'प्रतिधीयते' प्रतिमुखं धार्यते। स पूर्वं सेवत इत्यर्थः। [श्रूयते हि "ऋग्भिः पूर्वाह्णे दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्य" इति। यद्वा त्रिंश मुहू

[illegible] स्तुतिसदा सूर्याग्निना स्तूयत इत्यवगन्तव्यम् ॥ ४७ ॥

अथ सप्तमी ।

१ २ ३ १ २   ३ १ २   ३ १ २
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
३ १ २   ३ १ २
सूराय विश्वचक्षसे ॥४८॥

'त्ये' 'तायवः' 'यथा' प्रसिद्धास्तस्करा इव 'नक्षत्राणि' देवगृहरूपाणि ("देवगृहा वै नक्षत्राणि" इति श्रुत्यन्तरात्) यद्वा, इह लोके मानुषा ये स्वर्गमाप्नुवन्ति ते नक्षत्ररूपेण दृश्यन्ते । तथाच—श्रूयते—'यो वा इह यजते, अमुं स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम्' इति । यद्वा, तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते । 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि' इत्याम्नायात् । यास्कश्चाह—'नक्षत्राणि नक्षतेः गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणम्' इति) तथा विधानि नक्षत्राणि 'अक्तुभिः' रात्रिभिः सह 'अपयन्ति' अपगच्छन्ति । 'विश्वचक्षसे' विश्वस्य सर्वस्य प्रकाशकस्य 'सूराय' सूर्यस्य आगमनं दृष्ट्वेति शेषः (तस्करा नक्षत्राणि च रात्रिभिः सह सूर्यं आगमिष्यन्तीत्याकुलायन्तीत्यर्थः) । तायुरिति स्तेननाम । तायुस्तस्कर इति तन्नामसु पाठात् । अक्तुरिति रात्रिनाम । शर्वरी अक्तुरिति तन्नामसु पाठात् ॥ ४८ ॥

अथाष्टमी

३ १   १ २ ३   १ २ ३ २ ३ १ २
अदृश्रन्(१)स्य केतवो वि रश्मयो जनाँ

---

(१) "अदृश्रन्"—"अदृश्रम्" इति पाठो ।

१ २   १ २   ३ १ २

अनु । भ्राजन्तो अग्नयो यथा ॥४९॥

'अस्य' सूर्यस्य 'केतवः' प्रज्ञापकाः 'रश्मयः' दीप्तयः 'जनान् अनु अदृश्रन्' जनान् सर्वान् अनुक्रमेण प्रेक्षन्ते । सर्वं जगत् प्रकाशयन्तीत्यर्थः । तत्र दृष्टान्तः—'भ्राजन्तः' दीप्यमानाः 'अग्नय इव' ॥ ४९ ॥

अथ नवमी ।

२ ३ १ २ ३ १ २   ३ १ २

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि

२ ३ १   २ ३

सूर्य । विश्वमाभासि रोचनम् ॥५०॥

हे 'सूर्य' त्वं 'तरणिः' प्रभूतेन अन्येन गन्तुमशक्यस्य अध्वनो गन्तासि (तथाच स्मर्यते—"योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ॥" इति । यद्वा, उपासकानां रोगात्तारयितासि । "आरोग्यं भास्करादिच्छेत्" इति स्मरणात्) तथा 'विश्वदर्शतः' विश्वैः सर्वैः प्राणिभिर्दर्शनीयः (आदित्य-दर्शनस्य चण्डालादि-दर्शन-जनित-पाप-निबर्हण-हेतुत्वात् । तथाचापस्तम्बः—'दर्शने ज्योतिषां दर्शनम्' इति । यद्वा, 'विश्वं' सर्वं भूतजातं 'दर्शतं' द्रष्टृ प्रकाश्यं येन स तथोक्तः) तथा 'ज्योतिष्कृत्' ज्योतिषः प्रकाशस्य कर्ता । सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः (यद्वा, चन्द्रादीनाम् । रात्रौ हि अम्मये चन्द्रादिषु सूर्य-किरणाः प्रतिफलिताः सन्तोऽन्धकारं निवारयन्ति । यथा द्वारस्थ दर्पणोपरि निपतिताः सूर्यरश्मयो गृहान्तर्गतं तमो निवारयन्ति तद्वदित्यर्थः) यस्मादेवं तस्मात् 'विश्वं' सर्वं 'रोचनं' रोचमानम् 'आ' समन्तात् 'भासि' प्रकाशयसि ।

यद्वा, हे "सूर्य्य!" अन्तर्यामितया सर्वस्य प्रेरक परमात्मन्! "तरणि" संसाराब्धेस्तारकोऽसि। यस्मात् त्वं 'विश्वदर्शतः' विश्वैः सर्वैर्मुमुक्षुभिर्दर्शतो द्रष्टव्य साक्षात्कर्त्तव्य इत्यर्थ [अधिष्ठान साक्षात्कारे हि आरोपितं निवर्त्तते] ज्योतिष सूर्य्यादेः कर्त्ता [तथाचाम्नायते—"चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो अजायत" इति] इत्यस्त्वं चिद्रूपतया 'विश्वं' सर्वं इदं जातं 'रोचमानं' दीप्यमानं यथा भवति तथा 'आभासि' प्रकाशयसि (त्वैव त्वत्कारणे हि सर्वं जगत् दृश्यते। तथाचाम्नायते—"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति॥ ५०॥

अथ दशमी।

३ २ ३ १ २ १ ३ २ ३ १र ३२ ३ १
प्रत्यङ्देवानांविशः प्रत्यङ्ङुदेषिमा
२ ३ २ ३ १र २ ३
नुषान्। प्रत्यङ्विश्वꣳस्वर्दृशे॥५१॥

हे सूर्य्य! त्वं 'देवानां' 'विशः' मरुन्नामकान् देवान् ["मरुतो वै देवानां विशः" इति श्रुत्यन्तरात्। तान्मरुत प्रकाश देवान् 'प्रत्यङ् उदेषि' प्रतिगच्छन्नुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा 'मानुषान्' मनुष्यान् प्रत्यङ् उदेषि। तेऽपि यथा त्वदभिमुख एव सूर्य्य उदेतीति मन्यन्ते तथा। 'विश्वं' नाम 'स्वः' द्युलोकं 'दृशे' द्रष्टुं 'प्रत्यङ्' उदेषि। यथा स्वर्लोकवासिनो जना स्वस्वाभिमुखेन पश्यन्ति तथा उदेषीत्यर्थः [एतदुक्तं भवति—ये लोका पश्यन्ति ते जना सर्वेऽपि स्वस्वाभिमुख्येन सूर्य्यं पश्यन्तीति। तथाचाम्नायते—'तस्मात् सर्व एव मन्यते मां प्रत्युदगात्' इति॥५१॥

अथ एकादशी ।

१ २ ३ २ १ २ ३ १ २ २ ३ २

येनापावकचक्षसाभुरण्यन्तंजनाꣳ

१ २ १ २ २ १ २

अनु । त्वंवरुणपश्यसि ॥५२॥

हे 'पावक !' सर्वस्य शोधक ! 'वरुण !' अनिष्ट वारक सूर्य्य ! त्वं 'जनान्' प्राणिनः 'भुरण्यन्तं' धारयन्तं पोषयन्तं वा इमं लोकं येन 'चक्षसा' प्रकाशेन अनुपश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुमः इति शेषः । [यद्वा । उत्तरस्यामृचि सम्बन्धः, तेन चक्षसा उदेषीति । तथा च यास्केनोक्तम्—'तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्यामन्वयस्तेन व्याख्यातीति' ॥ ५२ ॥

अथ द्वादशी ।

१र २र ३ १ २ ३ २ २ १ २ २

व्यु(२)द्यामेषिरजः पृथ्वहामिमानोअ

१ २ ३ १ १ २

क्तुभिः । पश्यञ्जन्मानिसूर्य्य ॥५३॥

हे 'सूर्य्य !' त्वं 'पृथु' सुविस्तीर्णं 'रजः' लोकं ["लोका रजांस्युच्यन्ते" इति यास्क वचनात्] द्युलोकं 'द्याम्' अन्तरिक्षलोकम् 'व्येषि' उद्गच्छसि । किं कुर्वन् ? 'अहानि' 'अक्तुभिः' रात्रिभिः सह 'मिमानः' कल्पयन् [आदित्यगत्यधीनत्वादहोरात्रविभागस्य] तथा 'जन्मानि' जननवन्ति भूतजातानि 'पश्यन्' प्रकाशयन् । ५३ ॥

---

(२) "व्यद्याम्"—"विद्याम्" इति पाठौ ।

अथ त्रयोदशी।

१ २ ३ १ २ ३ १ ३ १ २ ३ २र
अयुक्तसप्तशुन्ध्युवः सूरोरथस्यनप्त्यः
१ २ ३ १ २
ताभिर्यातिस्वयुक्तिभिः ॥५४॥

'सूरः' सर्व्वस्य प्रेरकः सूर्य्यः, 'शुन्ध्युवः' शोधिकाः स्त्रियः। तादृशीः सप्त सप्त संख्याकाः 'अयुक्त' स्व रथे यान्। कीदृशीः? 'रथस्य' 'नप्त्यः' न पातयित्र्यः। रथो याति न पतति ईदृशीरित्यर्थः। २ अस्त्रीभिः स्वयुक्तिभि स्वकीय-योजनेन रथे यथागृह मत्वा गच्छति। अतस्तस्मै हविर्दातव्यमिति शेषः ॥ ५४ ॥

अथ चतुर्द्दशी।

३ १ २ ३ २ ३ २ ३ १ २
सप्तत्वाहरितोरथेवहंतिदेवसूर्य ।
२ १ २
शोचिष्केशंविचक्षण ॥५५॥

हे 'सूर्य्य !' 'देव !' द्योतमान ! 'विचक्षण' ! सर्व्वस्य प्रकाशयितः। 'सप्त' सप्त-सङ्ख्याकाः 'हरितः' अश्वाः रस-हरणशीलाः रश्मयो वा 'त्वा' त्वां 'वहन्ति' प्राप्नुवन्ति। कीदृशम्? 'रथे' अवस्थितमिति शेषः। तथा 'शोचिष्केशं' शोचींषि तेजांस्येव यस्मिन् केशा इव दृश्यन्ते स तथोक्तस्तमिति ॥ ५५ ॥

इति श्रीमद्भगवत्कुथुमर्षिप्रादुष्कृता
सायणाचार्य्यकृतभाष्यसहिता सामवेदीया
आरण्यसंहिता समाप्ता ॥

१६५ शब्दशक्तिप्रकाशिका (न्याय) ॥०
११६ मालतीमाधवनाटक सटीक ॥०
११७ भट्टिकाव्य टीकाद्वयसहित ६
११८ काव्यप्रकाश अलङ्कार सटीक ४
११९ शाण्डिल्यसूत्र सभाष्य ॥०
१२० हनुमन्नाटक महानाटकसटीक १॥०
१२१ महानाटकम् (हनुमन्नाटकम्) ॥०
१२२ दशरूपकम् (अलङ्कार) १
१२३ चम्पूरामायण सटीक १
१२४ (चम्पूरामायण) भोजचम्पू ॥०
१२५ मार्कण्डेयपुराणम् २
१२६ गोलाध्याय भास्कराचार्य्यकृत ॥०
१२७ गणिताध्याय भास्कराचार्य्यकृत १।
१२८ पञ्चदशी (सटीक) वेदान्त १॥०
१२९ पातञ्जलदर्शन भोजवृत्तिसहित १
१३० शकुन्तलानाटक सटीक १
१३१ शब्दरूपादर्श ॥०
१३२ वाराहीसंहिता (ज्योतिष) २
१३३ तर्कामृत (जगदीशकृत) न्याय ।०
१३४ द्वात्रिंशत्पुत्तलिकासिंहासन १
१३५ उत्तररामचरितनाटक सटीक १
१३६ शङ्करविजय १॥०
१३७ मृच्छकटिकनाटक सटीक १॥०
१३८ काव्यादर्श सटीक (अलङ्कार) १
१३९ अष्टाङ्गहृदय (वाग्भट) वैद्यक ३
१४० शुक्रनीतिसार सटीक १
१४१ गीतगोविन्द काव्य सटीक ॥०
१४२ अग्निपुराणम् ५
१४३ विष्णुपुराणम् सटीक ५
१४४ मीमांसादर्शनम् शबरभाष्यसहित १२
१४५ अध्यात्मरामायणम् सटीक १
१४६ महानिर्वाणतन्त्रम् सटीक ४
१४७ मीमांसादर्शनम् अधिकरणमाला
माधवाचार्य्यविरचिता ६
१४८ श्रुतबोध (छन्दोग्रन्थ) सटीक /
१४९ बालरामायणनाटक सटीक १
१५० लिङ्गपुराणम् ४
१५१ चण्डकौशिकनाटक सटीक ॥०
१५२ चैतन्यचन्द्रोदयनाटक सटीक १
१५३ कलापव्याकरण वा कातन्त्र २
१५४ कुसुमाञ्जलि सटीक (न्याय ॥०
१५५ [illegible] १॥
१५६ [illegible] ।०
१५७ नागानन्दनाटक सटीक ॥०
१५८ नागानन्दनाटक मूल ।०
१५९ ब्रह्मवैवर्त्तपुराण सम्पूर्ण [illegible]
१६० वैशेषिकदर्शनम् सभाष्य २
१६१ कल्किपुराणम् १
१६२ चाणक्यशतकम् सटीक /
१६३ श्रीहर्षचरितनाटकम् १
१६४ कर्पूरमञ्जरीनाटिका सटीक ॥
१६५ चन्द्रालोक प्राचीन अलङ्कार ।
१६६ लघुकौमुदीव्याकरणम् ॥
१६७ गरुडपुराणम्
१६८ गोपथब्राह्मण सभाष्य
१६९ नृसिंहतापनी सभाष्य
१७० आथर्वणोपनिषद् सभाष्य
१७१ निरुक्त सभाष्य १
१७२ मुग्धबोध व्याकरण सटीक १॥
१७३ भामती (वेदान्त)

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारिण
श्रीजीवानन्दविद्यासागर भट्टाचार्य्यस्य सकाशात् प्राप्तव्यानि ।